श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

प्रतिवादिभयङ्कर श्री अनन्ताचार्य विरचितं

# ॥ श्री वेङ्कटेश सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेङ्कटेश सुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ 1 ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु ॥ 2 ॥

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यमूर्ते।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेङ्कटेशदयिते तव सुप्रभातम् ॥ 3 ॥

तव सुप्रभातमरविन्दलोचने
भवतु प्रसन्नमुखचन्द्रमण्डले।
विधिशङ्करेन्द्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥ 4 ॥

अत्र्यादिसप्तऋषयस्समुपास्य सन्ध्यां
आकाशसिन्धुकमलानि मनोहराणि।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 5 ॥

पञ्चाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति।

भाषापतिः पठति वासरशुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 6 ॥

ईषत्प्रफुल्लसरसीरुहनारिकेल -
पूगद्रुमादिसुमनोहरपालिकानाम् ।
आवाति मन्दमनिलस्सह दिव्यगन्धैः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 7 ॥

उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठन्ति
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 8 ॥

तन्त्रीप्रकर्षमधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचाररम्यं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 9 ॥

भृङ्गावली च मकरन्दरसानुविद्ध -
झङ्कारगीतनिनदैस्सह सेवनाय ।
निर्यात्युपान्तसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 10 ॥

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुम्भाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ 11 ॥

पद्मेशमित्रशतपत्रगतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।

भेरीनिनादमिव बिभ्रति तीव्रनादम्
शेषाद्रिशेखरविभो तव सुप्रभातम्॥ **12**॥

श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीश्रीनिवास जगदेकदयैकसिन्धो।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **13**॥

श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चिसनन्दनाद्याः।
द्वारे वसन्ति वरवेत्रहतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **14**॥

श्रीशेषशैल गरुडाचलवेङ्कटाद्रि -
नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्याम्।
आख्यां त्वदीयवसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **15**॥

सेवापराश्शिवसुरेशकृशानुधर्म -
रक्षोम्बुनाथ पवमान धनाधिनाथाः।
बद्धाञ्जलि प्रविलसन्निजशीर्ष देशाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **16**॥

धाटीषु ते विहगराज मृगाधिराज -
नागाधिराज गजराज हयाधिराजाः।
स्वस्वाधिकार महिमादिकमर्थयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **17**॥

सूर्येन्दु भौम बुध वाक्पति काव्यसौरि -
स्वर्भानु केतु दिविषत्परिषत्प्रधानाः।

त्वद्दास दास चरमावधि दासदासाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **18**॥

त्वत्पादधूलि भरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्ग निरपेक्ष निजान्तरङ्गाः।
कल्पागमाऽऽकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **19**॥

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **20**॥

श्रीभूमिनायक दयादिगुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते।
श्रीमन्ननन्तगरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **21**॥

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुण्ठ माधव जनार्दन चक्रपाणे।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **22**॥

कन्दर्पदर्पहर सुन्दर दिव्यमूर्ते
कान्ताकुचाम्बुरुह कुड्मल लोलदृष्टे।
कल्याणनिर्मलगुणाकर दिव्यकीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **23**॥

मीनाकृते कमठ कोल नृसिंह वर्णिन्
स्वामिन् परश्वथतपोधन रामचन्द्र।

शेषांशराम यदुनन्दन कल्किरूप
    श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **24** ॥

एला लवङ्ग घनसारसुगन्धितीर्थं
    दिव्यं वियत्सरिति हेमघटेषु पूर्णम्।
धृत्वाऽद्य वैदिक शिखामणयः प्रहृष्टाः
    तिष्ठन्ति वेङ्कटपते तव सुप्रभातम्॥ **25** ॥

भास्वानुदेति विकचानि सरोरुहाणि
    संपूरयन्ति निनदैः ककुभो विहङ्गाः।
श्रीवैष्णवास्सतत मर्थितमङ्गळास्ते
    धामाऽऽश्रयन्ति तव वेङ्कट सुप्रभातम्॥ **26** ॥

ब्रह्मादयस्सुरवरास्समहर्षयस्ते
    सन्तस्सनन्दनमुखास्त्वथ योगिवर्याः।
धामान्तिके तव हि मङ्गळवस्तुहस्ताः
    श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **27** ॥

लक्ष्मीनिवास निरवद्यगुणैकसिन्धो
    संसार सागर समुत्तरणैकसेतो।
वेदान्तवेद्यनिजवैभव भक्तभोग्य
    श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ **28** ॥

इत्थं वृषाचलपतेरिह सुप्रभातम्
    ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः।
तेषां प्रभातसमये स्मृतिरङ्गभाजां
    प्रज्ञां परार्थसुलभां परमां प्रसूते॥ **29** ॥

॥ इति श्री वेङ्कटेश सुप्रभातं समाप्तम्॥